# Shri DakshinAmurtistotram

# શ્રીદક્ષિણામૂર્તિસ્તોત્રમ્

## Document Information

Text title : dakShiNAmUrtistotra 5

File name : dakShiNAmUrtistotram5.itx

Category : shiva, stotra

Location : doc_shiva

Transliterated by : NA

Proofread by : NA

Latest update : Octiber 18, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 18, 2020

*sanskritdocuments.org*

# શ્રીદક્ષિણામૂર્તિસ્તોત્રમ્

નતખેટનિશાટકિરીટતટી ઘટિતોપલપાટલપીઠિતલમ્ ।
તટિદાભજટાપટલીમકુટં વટમૂલકુટીનિલયં કલયે ॥ ૧॥

સ્મરણં ખલુ યચ્ચરણામ્બુજયોર્ભરણાય ભવોત્તરણાય ભવેત્ ।
શરણં કરુણાવરુણાવસથં ભજ બાલસુધાકિરણાભરણમ્ ॥ ૨॥

પરિકીર્ણસુવર્ણસવર્ણજટાભ્રમદભ્રસરિચ્છરદભ્રરુચિઃ ।
મકુટોકુટિલં છટયન્ શશિનં નિટિલેનલદૃગ્જટિલો જયતિ ॥ ૩॥

વરભૂજકુટીઘટિતસ્ફટિકોપલકુટ્ટિમવેદિતલે વિમલે ।
સ્મિતફુલ્લમુખં ચિદુપાત્તસુખં પુરવૈરિમહઃ કરવૈ હૃદયે ॥ ૪॥

અકલઙ્કશશાઙ્કસહસ્રસહોદરદીધિતિદીપિતદિગ્વલયમ્ ।
નિગમાગમનીરધિનિર્મથનોદિતમાકલયામ્યમૃતં કિમપિ ॥ ૫॥

વિષભૂષમપાકૃતદોષચયં મુનિવેષવિશેષમશેષગુરુમ્ ।
ધૃતચિન્મયમુદ્રમહં કલયે ગતનિદ્રમમુદ્રસમાધિવિધૌ ॥ ૬॥

દૃઢયોગરસાનુભવોત્કલિકં પ્રસરત્પુલકં ક્રતુભુક્તિલકમ્ ।
ભસિતોલ્લસિતાલિકવિસ્ફુરિતાનલદૃક્તિલકં કલયેન્દુશિખમ્ ॥ ૭॥

વદ ચિત્ત કિમાત્તમભૂદ્ભવતા ભ્રમતા બહુધાખિલદિક્ષુ મુધા ।
નિજશર્મકરં કુરુ કર્મ પરં ભવમેવ ભયાપહમાકલય ॥ ૮॥

વરપુસ્તકહસ્તમપાસ્તતમઃ શ્રુતિમસ્તકશસ્તસમસ્તગુણમ્ ।
મમ નિસ્તુલવસ્તુ પુરોઽસ્તુ વરં પ્રણવપ્રવણપ્રવરાવગતમ્ ॥ ૯॥

ઇતિ શ્રીદક્ષિણામૂર્તિસ્તોત્રં સમ્પૂર્ણમ્ ॥

*Shri DakshinAmurtistotram*

pdf was typeset on October 18, 2020

Please send corrections to *sanskrit@cheerful.com*